अध्वर्य्युः, पुं, (अध्वरं यज्ञं यौति सम्पादयति अध्वर + यु + कर्त्तरि क्विप्, पृषोदरादित्वात् तुम्भावः रस्याकारलोपः, होमकारी ऋत्विक् ।) यजुर्वेद- .। इत्यमरः ॥ (यथा कुमारसम्भवे,—
"विवाहयज्ञे वितते ऽत्र यूय-
मध्वर्य्यवः पूर्ब्बवृता मयेति" ।)

अध्वशल्यः, पुं, (अध्वनि पथि शल्यमिव आचरति सकण्टकतया अध्वशल्य + क्विप् ततोऽच् ।) अपामार्गः । इति राजनिर्घण्टः ॥

अध्वा [न्] पुं, (अत्ति गमनेन बलं नाशयति, अद् + शाङ्ख्यात् क्वनिप्, पृषोदरादित्वात् दकारस्य धः ।) पन्थाः । कालः । संस्थानं । अवस्कन्दः । इति मेदिनी ॥ शास्त्रं । स्कन्धः । इति च पाठान्तरं ॥ अध्वगमनजन्यगुणाः । मेदःकफस्थूलतासौकुमार्य्यनाशित्वं । इति राजवल्लभः ॥

अध्वान्तशावः, पुं, (अध्वान्तस्य वर्त्मसीमायाः शावः शिशुवत्, षष्ठीतत्पुरुषः ।) श्योनाकवृक्षः ॥ इति शब्दचन्द्रिका ॥

अन श लु प्राणने । जीवने । इति कविकल्पद्रुमः ॥ श लु अनिति लोको जीवति इत्यर्थः । इति दुर्गादासः ॥

अन ङ य प्राणने । जीवने । इति कविकल्पद्रुमः ॥ य ङ अन्यते । इति दुर्गादासः ॥

अनंशुमत्फला, स्त्री, (न अंशुमत् मोचान्तर्व्वर्त्तितया सूर्य्यकिरणशून्यं फलं यस्याः सा ।) अंशुमत्फला । कदली । इति जटाधरः ॥

अनः [स्] क्ली, (अनिति जीवत्यनेन जीविकोपायत्वात् अन् + असुन् ।) शकटं । इत्यमरः ॥ (यथा मनुः,—
"होता वापि हरेदश्वमुद्गाता चाप्यनःक्रये" ।)
अन्नं । इत्युणादिकोषः ॥ जननी । जन्म । जन्मी । इति कोषान्तरं ॥

अनकः, त्रि, (अन् + अच् + कुत्सायां कन् ।) अधमः । अधमः । इत्यमरटीकायां भरतः ॥

अनगारः, पुं, (नास्ति अगारं गृहं यस्य सः, गृहस्थाश्रमशून्यः ।) ऋषिः । मुनिः । इति हेमचन्द्रः ॥ अगारशून्ये वाच्यलिङ्गः ॥

अनग्निः, पुं, (नास्ति श्रौतः स्मार्त्तो वा अग्निर्यस्य सः ।) श्रौतस्मार्त्तकर्म्महीनः ॥ इति महाभारते दानधर्म्मः ॥ (अनाहिताग्निर्ब्राह्मणः । यथाह मनुः,
"अग्नीनात्मनि वैतानान् समारोप्य यथाविधि ।
अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः" ॥)

अनघः, त्रि, (नास्ति अघं पापं यस्य सः ।) अपापः । निर्म्मलः । मनोज्ञः । इति मेदिनी ॥ (यथा शाकुन्तले—
"अखण्डं पुण्यानां फलमिव च तद्रूपमनघं" ॥)

अनङ्गं, क्ली, (नास्ति अङ्गमवयवो यस्य तत् ।) आकाशं । मनः । इति मेदिनी ।

अनङ्गः, पुं, (नास्ति अङ्गं कायो यस्य सः ।) कामदेवः । इत्यमरः ॥ (यथा मेदिनी । "अनङ्गो मदनेऽनङ्गमाकाशमनसोरपि" ॥) अङ्गरहिते वाच्यलिङ्गः ॥

अनङ्गकं, क्ली, (नास्ति अङ्गमाकारो यस्य तत्, ततः स्वार्थे कः ।) चित्तं । मनः । इति शब्दरत्नावली ॥

अनङ्गासुहृत् [द्] पुं, (अनङ्गस्य कामदेवस्य असुहृत् शत्रुः शिवललाटाग्निना तद्देहभस्मीकरणात् ।) शिवः । इति हेमचन्द्रः ॥

अनच्छः, त्रि, (न अच्छः निर्म्मलः ।) आविलः । अनिर्म्मलः । इत्यमरः ॥

अनञ्जनं, क्ली, (नास्ति अञ्जनं स्वमूर्त्तिप्रकाशो यस्य तत्, निराकारत्वात्, अन्ज + भावे ल्युट् ।) आकाशं । इति शब्दचन्द्रिका ॥ अञ्जनशून्ये त्रि ॥ (यथा साहित्यदर्पणे,—
"नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः" ।)

अनड्जिह्वा, स्त्री, (अनडुहो वृषभस्य जिह्वेव जिह्वा पत्रं यस्याः सा स्त्रियां टाप् ।) गोजिह्वावृक्षः । इति राजनिर्घण्टः ॥

अनडुही, स्त्री, (अनडुह् + गौरादित्वात् ङीष् पक्षे आम् ।) अनड्वाही । इति हेमचन्द्रः ॥ गाइ इति भाषा ।

अनड्वान्, [डुह्] पुं, (अनडुह् + प्रथमैकवचनम् ।) वृषः । एँड़े इति भाषा । तत्पर्य्यायः । गौः २ भद्रः ३ बलीवर्द्दः ४ दम्यः ५ दान्तः ६ स्थिरः ७ बली ८ उक्षा ९ ककुद्मान् १० ऋषभः ११ वृषभः १२ वृषः १३ धुर्य्यः १४ धुरीयः १५ धौरेयः १६ शाङ्करः १७ शिववाहनः १८ रोहिणीरमणः १९ वोढ़ा २० गोनाथः २१ सौरभेयकः २२ । इति राजनिर्घण्टः ॥ (यथा मनुः,—
"अजमेषावनड्वाहं खरं हत्यैकहायनम्" ॥)

अनड्वाही, स्त्री, (अनडुह् + गौरादित्वात् ङीष्, आमागमश्च आमभावपक्षे केवलं ङीष् ।) अनडुही । स्त्रीगवी । इति हेमचन्द्रः ॥ गाइ इति भाषा ।

अनद्यः, पुं, (अद् + कर्म्मणि ण्यत् संज्ञापूर्ब्बकविधेरनित्यत्वात् वृद्ध्यभावः, न अद्यः अप्रशस्तखाद्यः, नञ्समासः, नञत्र अप्राशस्त्ये ।) गौरसर्षपः । इति राजनिर्घण्टः ॥

अनधिगतः, त्रि, (अधि + गम् + कर्म्मणि क्तः, न अधिगतः ज्ञातः, नञ्समासः । गतभिन्नः प्राप्तभिन्नः ।) अनवगतः । यथा,—"अरे विद्वन्मन्याह्यनधिगतवेदार्थविभवाः" । इति भगवद्वाक्यमिति प्रामाणिकाः ॥

अनध्यक्षः, त्रि, (अक्षमिन्द्रियमधिगतः प्रादिसमासः, प्रत्यक्षः तद्भिन्नः नञ्समासः ।) अप्रत्यक्षः । इत्यमरटीकायां रमानाथः ॥ अध्यक्षभिन्नः ॥

अनन्तं, क्ली, (नास्ति अन्तः सीमा यस्य तत् ।) आकाशं । इत्यमरः ॥ अभ्रकं । इति राजनिर्घण्टः ॥

अनन्तः, पुं, (नास्ति अन्तः विनाशो यस्य सः, तथाहि भागवते "लोके नष्टे द्विपरार्द्धावसाने भवानेकः शिष्यते शेषसंज्ञः" ।) विष्णुः । इति मेदिनी ॥ बलदेवः । अनन्तजिन्नाम जिनः । इति हेमचन्द्रः ॥ शेषनागः । इत्यमरः ॥ वासुकिः । इति शब्दमाला ॥ सिन्दुवारवृक्षः । इति राजनिर्घण्टः ॥

अनन्तः, त्रि, (नास्ति अन्तः सीमा विनाशो वा यस्य सः ।) अन्तरहितः । अनवधिः । अशेषः । असीमः । इत्यमरो मेदिनी च ॥ (यथा कुमारसम्भवे ।—"अनन्तरत्नप्रभवस्य यस्य" ।)

अनन्तजित्, पुं, (जयतीति जि + कर्त्तरि क्विप्, अनन्तो नाम जित् जयी बौद्धविशेषः शाकपार्थिवादित्वात् समासः मध्यपदलोपश्च ।) जिनानां चतुर्व्विंशत्यन्तर्गतचतुर्द्दशजिनः । तत्पर्य्यायः । अनन्तः २ । इति हेमचन्द्रः ॥

अनन्ततीर्थकृत्, पुं, (अनन्तानि असङ्ख्यानि तीर्थानि शास्त्राणि कर्म्मधारयः, तानि कृतवान् अनन्ततीर्थ + कृ + क्विप्, उपपदसमासः ।) अनन्तजित् । इति हेमचन्द्रः ॥ (अनन्तजित् नाम जिनः ॥)

अनन्तरं, त्रि, (नास्ति अन्तरमवकाशो यस्य तत् ।) अनवकाशं । अन्तररहितं । तत्पर्य्यायः ॥ अव्यवहितं २ संसक्तं ३ अपटान्तरं ४ । इति हेमचन्द्रः ॥ पश्चादर्थे क्ली ॥ (पश्चात् । ततःपरं । यथा रघुवंशे,—"पितुरनन्तरमुत्तरकोशलान्" ॥)

अनन्तविजयः, पुं, (विजयतेऽनेन वि + जि + करणे अच्, ततोऽनन्तानामसङ्ख्यानां शत्रूणां शब्देन विजयः विजयसाधनम् षष्ठीतत्पुरुषः ।) युधिष्ठिरराजस्य शङ्खः । इति श्रीभगवद्गीता ॥

अनन्तवीर्य्यः पुं, (अनन्तमसीमं वीर्य्यं तेजो यस्य सः ।) भाविकल्पे जिनानां चतुर्व्विंशत्यन्तर्गतत्रयोविंशतीर्थकरजिनः । इति हेमचन्द्रः ॥

अनन्तव्रतं, त्रि, (अनन्तस्य तन्नामकदेवस्य व्रतं षष्ठीतत्पुरुषः ।) भाद्रशुक्लचतुर्दशीकर्त्तव्यमनन्तदेवस्य व्रतं । तद्विधिर्यथा । भविष्ये,—
"अनन्तव्रतमेतद्धि सर्व्वपापहरं शुभं ।
सर्व्वकामप्रदं नृणां स्त्रीणाञ्चैव युधिष्ठिर ॥
तथा शुक्लचतुर्द्दश्यां मासि भाद्रपदे भवेत् ।
तस्यानुष्ठानमात्रेण सर्व्वपापं प्रणश्यति" ॥ * ॥
व्रतारम्भप्रतिष्ठयोर्व्वर्ज्यकालमाह ज्योतिषे,—
"गुरोर्भृगोरस्तबाल्ये वार्द्धके सिंहगे गुरौ ।
वक्रिजीवाष्टविंशेऽह्नि गुर्व्वादित्ये दशाहिके ॥
पूर्व्वराशावनायातातिचारिगुरुवत्सरे ।
प्राग्राशिगन्तृजीवस्य चातिचारे त्रिपक्षके ॥
कम्पाद्यद्भुतसप्ताहे नीचस्थेज्ये मलिम्लुचे ।
भानुलङ्घितके मासि क्षये राहुयुते गुरौ ॥
पौषादिकचतुर्म्मासे चरणाङ्कितवर्षणे ।
. . .नाङ्गा चैकदिने द्वितीयेन दिनत्रये ॥
तृतीयेन तु सप्ताहे माङ्गल्यानि शुभान्विताः ।
विद्यारम्भकर्णवेधौ चूड़ोपनयनोद्वहान् ॥
तीर्थस्नानमनावृत्तं तथानादिसुरेक्षणं ।
परीक्षारामयज्ञांश्च पुरश्चरणदीक्षणे ॥
व्रतारम्भप्रतिष्ठे च गृहारम्भप्रवेशने ।
प्रतिष्ठारम्भणे देवकूपादेर्व्वर्ज्जयन्ति हि ॥
द्वात्रिंशद्दिवसास्यास्ते जीवस्य भार्गवस्य च ।
द्वासप्ततिर्म्महत्यस्ते पादास्ते द्वादशक्रमात् ॥
अस्तात् प्राक् परयोः पक्षं गुरोर्वार्द्धकबालते ।
पक्षं वृद्धो महास्ते तु भृगुर्बालो दशाहिकः ॥
पादास्ते तु दशाहानि वृद्धोबालो दिनत्रयं" ॥ * ॥